| अथोपपातकानि। | प्रायश्चित्तानि। | तदशक्तौ धेनुदानम्। | तदशक्तौ चूर्णीदानम्। | दक्षिणा। |
|---|---|---|---|---|
| ब्राह्मणस्य वेदानध्ययनं यज्ञाकरणं पुत्रानुत्पादनञ्च। | त्रैमासिकं गोव्रतम्। | १२ धेनवः। | ३६ कार्षापणाः। | १ वृषः। १० गावः। अशक्तौ १५ कार्षापणाः। |
| अनाश्रमित्वम्। | संवत्सरे प्राजापत्यम्। | १ धेनुः। | ३ कार्षापणाः। | यथाशक्ति। |
| | वर्षद्वये अतिकृच्छ्रम्। | ३ धेनवः। | ९ कार्षापणाः। | यथाशक्ति। |
| | वर्षत्रये कृच्छ्रातिकृच्छ्रम्। | ६ धेनवः। | १८ कार्षापणाः। | यथाशक्ति। |
| | अत ऊर्द्ध्वं चान्द्रायणम्। | सार्द्धसप्तधेन्वसम्भवात् ८ धेनवः। | २२॥० कार्षापणाः। | यथाशक्ति। |
| सूर्य्योदयास्तकालयोः शयनम्। | सकृदाचरणे स्नानम्। अभ्यासे प्राजापत्यम्। | १ धेनुः। | ३ कार्षापणाः। | यथाशक्ति। |
| ब्रह्मचारिणः सन्ध्यादीनामतिक्रमः। आदिना अग्नीन्धनाकरणं भैक्ष्यचर्य्याकरणञ्च। | अरोगिणो निरन्तरं सप्तरात्रमकरणे अवकीर्णिव्रतम्। तत्तु खरचर्म्मपरिधानपूर्व्वकषाण्मासिकं ब्रह्महत्याव्रतम्। एतदूने ऊनं अधिके अधिकम्। | सार्द्धसप्तधेन्वसम्भवात् ८ धेनवः। | २२॥० कार्षापणाः। | ५ गावः। अशक्तौ ४।१५ कार्षापणाः। |
| अनातुरगृहस्थस्य सन्ध्यास्नानाह्निकनित्यक्रियापातः। | दिनैकनित्यक्रियातिपाते एकाहोपवासः। | ० | ६ रक्तिकरजतम्। | यथाशक्ति। |
| | दिनत्रयक्रियातिपाते कृच्छ्रार्द्धम्। | ० | १॥० कार्षापणाः। | यथाशक्ति। |
| | वर्षैकनित्यक्रियातिपाते एकदिनक्रियातिपातप्रायश्चित्तानुसारेण प्रायश्चित्तम्। | ० | २ पल ६ तोलक ४ माषकमितरजतम्। | यथाशक्ति। |
| शूद्रव्यतिरिक्तायाज्ययाजनम्। अयाज्याश्च निन्दितप्रतिग्रहादिना निन्दितब्राह्मणादयः। | शतगायत्रीजपः। | ० | ० | ० |
| | अभ्यासे सहस्राधिकं चान्द्रायणं वा। दक्षिणात्यागाच्च पूतो भवति। | सार्द्धसप्तधेन्वसम्भवात् ८ धेनवः। | २२॥० कार्षापणाः। | यथाशक्ति। |
| शूद्रयाजनम्। | लोभादिना याजने अर्जितभुक्तावशिष्टधनस्यागाधजले प्रक्षेपपूर्व्वकं ब्रह्मचारिणे दानपूर्व्वकं वा चान्द्रायणं पुनरुपनयनञ्च। अक्षारलवणब्रह्मसुवर्चलापानञ्च। एतदशक्तौ तद्धनं परित्यज्य त्रिंशत्पुराणाः प्रदातव्याः। | सार्द्धसप्तधेन्वसम्भवात् ८ धेनवः। | २२॥० कार्षापणाः। | यथाशक्ति। |
| | स्नेहादनुप्रसङ्गादिना याजने द्रव्यत्यागपूर्व्वकं प्राजापत्यम्। अज्ञानतः प्राणायामसहस्रम्। | १ धेनुः। | ३ कार्षापणाः। | यथाशक्ति। |
| शूद्रप्रतिग्रहः। | सकृत्प्रतिग्रहे त्रिसहस्रगायत्रीजपः। अभ्यासे चान्द्रायणम्। एतच्च द्रव्यत्यागपूर्व्वकं कार्य्यम्। | सार्द्धसप्तधेन्वसम्भवात् ८ धेनवः। | २२॥० कार्षापणाः। | यथाशक्ति। |
| उञ्छावृत्तिक्षत्रियनृपतिप्रतिग्रहः। | षष्ठे काले क्षीराशनं मासैकं जलवासः प्रचुरतरद्विजतर्पणञ्च। मासोपवासेनैवास्य सङ्कलनम्। | १५ धेनवः। | ४५ कार्षापणाः। | यथाशक्ति। |
| अथान्य प्रतिग्रहः। स च अयाचितपुष्पफलशाकलवणकाष्ठधान्यपयोमांसदधिशय्यागृहकुशगन्धमणिमत्स्यादीतरविषयः। | ज्ञानादष्टचत्वारिंशद्दाराभ्यासात् द्वादशवार्षिकव्रतम्। | १८० धेनवः। | ५४० कार्षापणाः। | १०० गावः। अशक्तौ १०० कार्षापणाः। |
| | अज्ञानात् द्विरभ्यासे तप्तकृच्छ्रम्। | ४ धेनवः। | १२ कार्षापणाः। | यथाशक्ति। |
| | ज्ञानात् द्विरभ्यासे चान्द्रायणम्। | सार्द्धसप्तधेन्वसम्भवात् ८ धेनवः। | २२॥० कार्षापणाः। | यथाशक्ति। |
| चाण्डालप्रतिग्रहः। | अज्ञानात् अष्टचत्वारिंशद्दाराभ्यासात् द्वादशवार्षिकव्रतम्। | १८० धेनवः। | ५४० कार्षापणाः। | १०० गावः। अशक्तौ १०० कार्षापणाः। |
| | अज्ञानात् सकृत्कृते तप्तकृच्छ्रम्। | ४ धेनवः। | १२ कार्षापणाः। | यथाशक्ति। |
| | ज्ञानात् सकृत्कृते चान्द्रायणम्। | सार्द्धसप्तधेन्वसम्भवात् ८ धेनवः। | २२॥० कार्षापणाः। | यथाशक्ति। |
| पतितप्रतिग्रहः। | ज्ञानात् सकृत्कृते चान्द्रायणम्। अज्ञानात्तदर्द्धम्। | सार्द्धसप्तधेन्वसम्भवात् ८ धेनवः। | २२॥० कार्षापणाः। | यथाशक्ति। |